
।। श्री: ।।



।। श्रीपरांकुशपरकालयतिवरवरवरमुनिभ्यो नम: ।।

।। श्रीवादिभीकरमहागुरवे नम:।।

श्रीकांची प्रतिवादि भयंकर मठ

गुरुपरम्परा



।। श्रीरुक्मणी श्रीसत्यभामा समेत श्रीवेणुगोपाल भगवान।।

प्रकाशक

श्री कांची प्रतिवादि भयंकर मठ

गादी स्वामी तिरुमालिगै,

31/13, सन्निधि स्ट्रीट,

कांचीपुरम् - 631 501, (तमिळनाडू)

फोन - 04427268718, मोबा.- 09364324844

E-mail - kcm.pbananth@gmail.com

Kalasangam Press 09890126005



श्री शठकोप स्वामीजी




श्रीमद्जगद्गुरु
भगवद्रामानुजाचार्य स्वामीजी



श्रीरामानुज अपरावतार विशदवाक्शिखामणि
श्रीवरवरमुनी स्वामीजी



श्रीकांची प्रतिवादि भयंकर
श्री अण्णा स्वामीजी



अनन्त श्रीविभूषित श्रीमद्वेदमार्ग प्रतिष्ठापनाचार्य
उभय वेदांताचार्य जगद्गुरु श्री श्री १००८
श्रीकांची प्रतिवादि भयंकर सिंहासनाधीश्वर
श्री अनंताचार्य स्वामीजी महाराज



अनन्त श्रीविभूषित श्रीमद्वेदमार्ग प्रतिष्ठापनाचार्य
उभय वेदांताचार्य जगद्गुरु श्री श्री १००८
श्रीकांची प्रतिवादि भयंकर सिंहासनाधीश्वर
श्रीमत्कृष्णमाचार्य स्वामीजी महाराज



अनन्त श्रीविभूषित श्रीमद्वेदमार्ग प्रतिष्ठापनाचार्य
उभय वेदांताचार्य जगद्गुरु श्री श्री १००८
श्रीकांची प्रतिवादि भयंकर सिंहासनाधीश्वर
श्री श्रीनिवासाचार्य स्वामीजी महाराज



अनन्त श्रीविभूषित श्रीमद्वेदमार्ग प्रतिष्ठापनाचार्य
उभय वेदांताचार्य श्रीकांची प्रतिवादि भयंकर
श्रीअनन्ताचार्य स्वामीजी महाराज
(श्रीबालक स्वामीजी)

॥ श्रीः ॥



॥ श्रीपरांकुशपरकालयतिवरवरवरमुनिभ्यो नमः ॥

॥ श्रीवादिभीकरमहागुरवे नमः ॥

श्रीकांची प्रतिवादि भयंकर मठ

गुरुपरम्परा

।। श्रीवादिभीकरमहागुरवे नमः ।।

अनुक्रमणिका

***

|| श्रीवादिभीकरमहागुरवे नमः ||

नित्यानुसन्धेय गुरुपरम्परा

वाक्य गुरुपरम्परा

१. अस्मद् गुरुभ्यो नमः
२. अस्मत्परमगुरुभ्यो नमः
३. अस्मत्सर्वगुरुभ्यो नमः
४. श्रीमते रामानुजाय नमः
५. श्रीपरांकुशदासाय नमः
६. श्रीमद् यामुनमुनये नमः
७. श्रीराममिश्राय नमः
८. श्रीपुण्डरीकाक्षाय नमः
९. श्रीमन्नाथमुनये नमः
१०. श्रीमते शठकोपाय नमः
११. श्रीमते विष्वक्सेनाय नमः
१२. श्रियै नमः
१३. श्रीधराय नमः

(प्रातः उठते ही, स्नान के समय, तिलक लगाते समय, भगवान के आराधन के प्रारम्भ में, प्रसाद लेने के प्रारम्भ में, रात्रि शयन के पहले इन तेरह वाक्यों का पाठ करना चाहिए।)

श्लोक गुरुपरम्परा

अस्मद्देशिकमस्मदीय परमाचार्यानशेषान् गुरुन् ।
श्रीमल्लक्ष्मणयोगिपुंगव महापूर्णोमुनिंयामुनम् ।।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणम् ।
सेनेशं श्रियमिन्दिरा सहचरं नारायणं संश्रये ।।

(मूलमन्त्र द्वयमन्त्र चरमश्लोक का अनुसन्धान करना)

रहस्यत्रय

मूलमन्त्र :

ॐ नमो नारायणाय।

द्वयमन्त्र :

श्रीमन्नारायणचरणौ शरणं प्रपद्ये ।
श्रीमते नारायणाय नम : ।।

चरमश्लोक :

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अंहत्वा सर्व पापेभ्यो मोक्षयिष्यामि माशुच: ।।

गुरुपरम्परा तनियन्

(श्रीरंगनाथ भगवान से वर्तमान आचार्य तक आचार्यों के नाम एवं तनियन्)

श्रीरंगनाथ भगवान्

श्रीस्तनाभरणं तेज: श्रीरंगेशयमाश्रये ।
चिन्तामणिमिवोद्भान्तमुत्संगेऽनन्तभोगिन: ।।१।।

श्रीलक्ष्मीजी

नम:श्रीरंगनायक्यै यद्भ्रूविभ्रमभेदत: ।
ईशेशितव्यवैषम्यनिम्नोन्नतमिदं जगत् ।।२।।

श्रीविष्वक्सेनजी

श्रीरंगचन्द्रमसमिन्दिरया विहर्तुं,
विन्यस्य विश्वचिदचिन्नयनाधिकारम् ।
यो निर्वहत्यनिशमंगुलिमुद्रयैव,
सेनान्यमन्यविमुखास्तमशिश्रयाम: ।।३।।

श्रीशठकोप स्वामीजी

मातापितायुवतयस्तनया विभूति:,
सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य न: कुलपतेर्वकुलाभिरामं,
श्रीमत्तदंघ्रियुगलं प्रणमामि मूर्ध्ना ।।४।।

श्रीनाथमुनि स्वामीजी

नमोचिन्त्याद्भुताक्लिष्टज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाधभगवद्भक्तिसिन्धवे ।।५।।

श्रीपुण्डरीकाक्ष स्वामीजी

नम: पंकजनेत्राय नाथश्रीपादपंकजे ।
न्यस्तसर्वभरायास्मत्कुलनाथाय धीमते ।।६।।

श्रीराममिश्र स्वामीजी

अयत्नतो यामुनमात्मदास, मलर्कपत्रार्पण निष्क्रयेण ।
य: क्रीतवानास्थित यौवराज्यं, नमामि तं राममेयसत्वम् ।।७।।

श्रीयामुनाचार्य स्वामीजी

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ।।८।।

श्री महापूर्ण स्वामीजी

कमलापतिकल्याणगुणामृत निषेवया ।
पूर्ण कामाय सततं पूर्णाय महते नमः ।।९।।

श्रीरामानुज स्वामीजी

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म -
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद् गुरोर्भगवतोऽस्य दयैकसिन्धो :
रामानुजस्य चरणौ शरणं प्रपद्ये ।।१०।।

श्रीगोविन्दाचार्य स्वामीजी

रामानुजपदच्छाया गोविन्दाह्वानपायिनी ।
तदायत्तस्वरूपा सा जीयान्मद्विश्रमस्थली ।।११।।

श्रीपराशरभट्टर स्वामीजी

श्रीपराशरभट्टार्य : श्रीरंगेशपुरोहित : ।
श्रीवत्सांकसुत: श्रीमान् श्रेयसे मेऽस्तु भूयसे ।।१२।।

श्रीवेदान्ति स्वामीजी

नमो वेदान्तवेद्याय जगन्मंगलहेतवे ।
यस्य वागमृतासारपूरितं भुवनत्रयम् ।।१३।।

श्रीकलिवैरिदास स्वामीजी

वेदान्तवेद्यामृतवारिराशेर्वेदार्थसारामृतपूरमग्र्यम् ।
आदाय वर्षन्तमहं प्रपद्ये कारुण्यपूर्णं कलिवैरिदासम् ।।१४।।

श्रीकृष्णपाद स्वामीजी

श्रीकृष्णपादपादाब्जे नमामि शिरसा सदा ।
यत्प्रसादप्रभावेन सर्वसिद्धिरभून्मम ।।१५।।

श्रीलोकाचार्य स्वामीजी

लोकाचार्याय गुरवे कृष्णपादस्य सूनवे ।
संसारभोगिसन्दष्टजीवजीवातवे नमः ।।१६।।

श्रीशैलश स्वामीजी

नम: श्रीशैलनाथाय कुन्तीनगरजन्मने ।
प्रसादलब्धपरमप्राप्य कैंकर्यशालिने ।।१७।।

श्रीवरवरमुनिस्वामीजी

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम्।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ।।१८।।

श्रीप्रतिवादिभयंकर अण्णा स्वामीजी

वेदान्तदेशिककटाक्षविवृद्धबोधं
कान्तोपयन्तृयमिनः करुणैकपात्रम् ।
वत्सान्ववायमनवद्यगुणैरुपेतं
भक्त्या भजामि परवादिभयंकरार्यम् ।।१९।।

श्री श्रीनिवासाचार्य स्वामीजी

श्रीरम्यवरयोगीन्द्र - श्रीपादाब्जमधुव्रतम् ।
श्रीवादिभयकृत्सूनुं श्रीनिवासगुरुं भजे ॥२०॥

श्री अनन्ताचार्य स्वामीजी

श्रीमद्वादिभयंकरार्यतनयं तत्पादपद्माश्रितस्वान्तं
कान्तवराभिधानयमिनां कारुण्यसद्भाजनम् ।
श्रीवत्सान्वयभूषणं श्रितनिधिं वात्सल्यरत्नाकरं
वन्दे श्रीमदनन्तदेशिकवरं वेदान्तविद्यानिधिम् ॥२१॥

श्रीअभिराम स्वामीजी

परवादिभयंकरार्यपादप्रवणं तत्तनयं प्रवृद्धबोधम् ।
अभिरावराभिदं प्रपद्ये वरजामातृमुनीन्द्रपाददैवम् ।।२२।।

श्रीरामानुजाचार्य स्वामीजी

श्रीवादिभयकृत्पौत्रं तत्पादाब्जैकधारकम् ।
अनन्तार्यगुरो: पुत्रं रामानुजगुरुं भजे ।।२३।।

श्रीसौम्यवराचार्य स्वामीजी

यत्तातस्समभूदुदारमहिमानन्तार्यवर्यस्सतां
सम्पूज्य: प्रतिवादिभीकरगुरुर्यत्ताततातो महान् ।
यन्नाथ: परम: पुमान्नतनिधि: श्रीवेंकटाधीश्वर :
सेवे सौम्यवराभिधं गुरुवरं तं भास्वरं विद्यया ।।२४।।

श्रीवरदनारायणाचार्य स्वामीजी

विमतवादीभसिंहार्यवंशोद्भवं रुचिरजामातृसूनुं महान्तं वरम्।
सुगुणरामानुजार्यांघ्रिपद्माश्रितं वरदनारायणं मद्गुरुं संश्रये ।।२५।।

श्रीवेदान्ताचार्य स्वामीजी

वरदार्यगुरोः पुत्रं तत्पादाब्जैकधारकम् ।
ज्ञानभक्त्यादिजलधिं वन्दे वेदान्तदेशिकम् ।।२६।।

श्रीसौम्यवरदाचार्य स्वामीजी

वेदान्ताचार्यतनयं वेदान्तद्वयपरगम् ।
श्रीसौम्यवरदाचार्यं श्रेयसां निधिमाश्रये ।।२७।।

श्रीप्रणतार्तिहराचार्य स्वामीजी

निगमान्तगुरो: पुत्रं वत्सान्वयविभूषणम् ।
वरदार्यकृपापात्रं प्रणतार्तिहरं भजे ।।२८।।

श्रीवेदान्तदेशिक स्वामीजी

प्रणतार्तिहाराचार्यतनयं विनयोज्ज्वलम् ।
रम्योपयन्तृसच्छात्रं वन्दे वेदान्तदेशिकम् ।।२९।।

श्रीवरदाचार्य स्वामीजी

वेदान्तार्यतनूभवं वरदगुर्वात्तागमान्तद्वयं
श्रीवत्सान्वयहारनायकमणिं शिष्यौघसञ्जीवनम् ।
शान्तिक्षान्तिविरक्तिभक्तिविमलज्ञानक्रियाभास्वरं
वन्देहं वरदार्यदेशिकवरं वात्सल्यवारांनिधिम् ।।३०।।

श्रीवेंकटाचार्य स्वामीजी

वरदार्यगुरोः पुत्रं तत्पादाब्जैकधारकम् ।
वेदान्तद्वयनिष्णातं वेंकटार्यमहं भजे ।।३१।।

श्रीरंगाचार्य स्वामीजी

वेंकटार्यगुरोः पुत्रं तत्पादाब्जसमाश्रयम् ।
वेदान्तद्वयसारज्ञं वन्दे श्रीरंगदेशिकम् ।।३२।।

श्री श्रीनिवासाचार्य स्वामीजी

श्रीवत्सवंशकलशोदधिपूर्णचन्द्रं श्रीरंगराजतनयं रमणीयशीलम् ।
तस्मादवाप्तनिगमान्तयुगार्थसारं श्री श्रीनिवासगुरुशेखरमाश्रयाम: ।।३३।।

श्रीअनन्ताचार्य स्वामीजी

श्रीवादिभीकृत्कुलवारिराशिनिशाधिनाथं कलयामि नित्यम् ।
श्री श्रीनिवासार्यपदाब्जभृंगमनन्तवर्यं तनयं तदीयम् ।।३४।।

श्री श्रीनिवासाचार्य स्वामीजी

नित्यं त्वनन्तगुरुवर्यतनूजरत्नं, श्री श्रीनिवासपदपंकजचञ्चरीकम् ।
श्रीवेंकटार्यगुरुसाधिततत्वबोधं, श्री श्रीनिवासगुवर्यमहं प्रपद्ये ।।३५।।

श्रीपुष्करराज मे विराजमान (बडे) श्री अनन्ताचार्य स्वामीजी

श्रीवत्सवंशाम्बुधिपूर्णचन्द्रं श्री श्रीनिवासार्यगुरोस्तनूजम् ।
तत्प्राप्तवेदान्तयुगार्थसारमनन्तवर्यं प्रणमामि नित्यम् ।।३६।।

श्रीवेदान्ताचार्य स्वामीजी

वन्दे श्रीमदनन्तदेशिकदयाप्राप्तागमान्तद्वयं
श्रीवाग्भूषणभावबोधतदनुष्ठानादिदत्तादरम् ।
श्रीवत्सान्वयदुग्धवारिधिविधुं शान्त्यादिरत्नाकरं
स्वांघ्रिद्वन्द्वसमाश्रितातिसुलभं वेदान्तवर्याभिधम् ।।३७।।

श्री श्रीनिवासाचार्य स्वामीजी

वेदान्तयुग्मनिपुणं परवादिभीकृद्वेदान्तनामगुरुपुंगवपादभक्तम् ।
श्री श्रीनिवासगुरुमाश्रितपारिजातं ध्यायाम्यनन्तगुरुवर्यपदेऽभिषिक्तम् ।।३८।।

श्रीरामानुजाचार्य स्वामीजी

श्रीवत्सवंशकलशोदधिपूर्णचन्द्रं
श्री श्रीनिवासगुरुवर्यकृपैकपात्रम् ।
शान्त्यादिसद्गुणनिधिं चरमार्थनिष्ठं
रामानुजार्यमनिशं हृदि चिन्तयामि ।।३९।।

श्रीकृष्णमाचार्य स्वामीजी

श्रीवत्सवंशकलशोदधिपूर्णचन्द्रं
श्री श्रीनिवासगुरुवर्यकृपैकपात्रम् ।
रामानुजार्यतनयं विनयाभिरामम्
श्रीकृष्णदेशिकमहं प्रणतोऽस्मि नित्यं ।।४०।।

श्रीअनन्ताचार्य स्वामीजी

(श्री वेंकटेश मंदिर, मुम्बई फणसवाडी का प्रतिष्ठापना कराया)

श्रीवत्सवंशकलशोदधिपूर्णचन्द्रं श्रीकृष्णसूरिपदपंकजभृंगराजम् ।
श्रीरंगवेंकटगुरूत्तमलब्धबोधं भक्तया भजामि गुरुवर्यमनन्तसूरिम् ।।४१।।

श्रीकृष्णमाचार्य स्वामीजी

श्रीवत्सवंशकलशोदधिपूर्णचन्द्रं नित्यं त्वनन्तगुरुवर्यतनूजरत्नम् ।
श्रीमज्जगद्गुरुकृपापरिलब्धबोधं श्रीकृष्णदेशिकमहं शरणं प्रपद्ये ।।४२ ।।

वर्तमान श्री श्रीनिवासाचार्य स्वामीजी

श्रीवत्सवंशकलशोदधिपूर्णचन्द्रं श्रीकृष्णसूरितनयं सुधियं सुशीलम् ।
श्रीमज्जगद्गुरुदयेक्षणलक्ष्यधन्यं श्रीश्रीनिवासगुरुमन्वहमाश्रयेऽहम् ।।४३ ।।

अवतार तनियन

श्रीप्रतिवादिभयंकर अण्णा स्वामीजी

यद्वादिभीकरगुरोरवतारहेतुराषाढमासि जगदेकगुरोरिहासीत् ।
पुष्यं ततस्तदगमद्गुरुपुष्यसंज्ञां नूनं तदेव गुरुवासरसंगमेन ।।
आषाढे पुष्यभे जातं वादिभीकरमाश्रये
वेदान्ताचार्यसच्छिष्यं वरयोगिपदाश्रितम् ।।

श्रीपुष्करराज मे विराजमान (बडे) श्री अनन्ताचार्य स्वामीजी

वृश्चिके हस्तनक्षत्रे कांच्यां वत्सकुलोद्भवम् ।
श्री निवासगुरोस्सूनुमनन्तार्यमहं भजे ।।

श्रीकृष्णमाचार्य स्वामीजी

मिथुने शततारायां जातं वात्सल्यवारिधिम् ।
रामानुजार्यसत्पुत्रं श्रीकृष्णार्यमहं भजे ।।

श्रीअनन्ताचार्य स्वामीजी

(श्री वेंकटेश मंदिर, मुम्बई फणसवाडी का प्रतिष्ठापना कराया)

कुम्भे स्वातीतारकजातमनन्तार्यसूरिमहमीडे ।
श्री कृष्णार्यतनूजं वादिभयंकरकुलाब्धिचन्द्रमसम् ।।

श्री कृष्णमाचार्य स्वामीजी

जगद्गुरुवरानन्तसूरिसूनुं गुणोत्तमम् ।
श्री कृष्णार्यं प्लवे सिंहे स्वात्यां जातमुपास्महे ।।

।। श्रीमते रामानुजाय नमः ।।

पंच तनियन

श्रीशैलेशदयापात्रं धीभक्त्यादि गुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ।।१ ।।
लक्ष्मीनाथ समारम्भां नाथयामुन मध्यमाम् ।
अस्मदाचार्य पर्यन्तां वन्दे गुरुपरम्पराम् ।।२ ।।
यो नित्यमच्युतपदाम्बुजयुग्मरुक्म
व्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिंधोः
रामानुजस्य चरणौ शरणं प्रपद्ये ।।३ ।।

माता पिता युवतयस्तनया विभूति:
सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य न: कुलपतेर्वकुलाभिरामं
श्रीमत्तदंघ्रियुगलं प्रणमामि मूर्ध्ना ।।४।।
भूतंसरश्च महदाह्वयभट्टनाथ
श्री भक्तिसारकुलशेखर योगिवाहान् ।
भक्तांघ्रिरेणु परकाल यतीन्द्रमिश्रान्
श्रीमत्परांकुशमुनिं प्रणतोस्मि नित्यम् ।।५।।

*

|| श्रीवादिभीकरमहागुरवे नमः ||

श्रीप्रतिवादि भयंकर अण्णा स्वामीजी सुप्रभातम्

श्रीरम्यवरयोगीन्द्र श्रीपादाब्जमधुव्रतम् ।
श्रीवादिभयकृत्सूनं श्रीनिवासगुरुं भजे ॥

श्रीवत्सवंशकलशाम्बुधिपूर्णचन्द्र कृत्स्नेन वेदमकुटीयुगलेन चास्मान् ।
उज्जीवयाद्य तव पादसरोजभृङ्गान् श्रीवादिभीकरगुरो तव सुप्रभातम् ॥१॥

श्रीशंखचक्रशुभलांछन शुभ्रवस्त्र दिव्योपवीतपरिकर्मितबाहुरम्य ।
पद्माक्षसत्तुलसिकासरभव्यकण्ठ श्रीवादिभीकरगुरो तव सुप्रभातम् ॥२॥

एलालवङ्गपरिपूरितमज्जनाम्बु दातुं वृषाचलपतेस्समयोऽद्य जातः ।
दिव्योर्ध्वपुण्ड्रविलसन्मुखवारिजात श्रीवादिभीकरगुरो तव सुप्रभातम् ।।३।।

वादान्तनिर्जितकुदृष्टिपरम्परस्य पादान्तनम्रजगतो गुरुपुंगवस्य ।
वेदान्तदेशिकमणे : पदपद्मभृंग श्रीवादिभीकरगुरो तव सुप्रभातम् ।।४।।

सद्द्राविडीभणितिवेदसमुच्चयाब्धि शीतांशु रम्यवरयोगिदयैकपात्र ।
सर्वातिशायिगरिमन् कदनार्थजात दुर्वादिभीकरगुरो तव सुप्रभातम् ।।५।।

मोचाफलाभ शुभवाक् सरणि प्रणीत स्वाचार्यसन्नुतिमयामृतसत्प्रणाळ्या ।
सञ्जीवयन् भवदवाग्नि नितान्ततप्तान् श्रीवादिभीकरगुरो तव सुप्रभातम् ।।६।।

आषाढमासगतपुष्यमहर्क्षजात काषायकुण्ठितयतीश्वरसक्तचित्त ।
दोषाचलेन्द्र शतकोटि महाप्रभाव श्रीवादिभीकरगुरो तव सुप्रभातम् ।।७।।

शीतोऽद्य वाति पवनश्शतवत्रपाळि: हर्षत्समुन्मिषति कूजति ताम्रचूड: ।
स्नातुं प्रजागृहि सस्वरतिनिर्मलेषु श्रीवादिभीकरगुरो तव सुप्रभातम् ।।८।।

श्रीवेंकटाद्रिनिलयं श्रितकामधेनु रंगाधिपं च यदुशैलगजाद्रिनाथौ ।
स्तोतुं पुराणवचसा विजहीहि निद्रां श्रीवादिभीकरगुरो तव सुप्रभातम् ।।९।।

श्री श्रीनिवासकलितस्तुतिपात्रभूत श्रीभाष्यतत्वपरिशीलनजागरुक ।
श्रीवैष्णवार्यगणदास इति प्रतीत श्रीदास्यनाममहिमन् तव सुप्रभातम् ।।१०।।

*

श्रीवादिभीकरमहागुरवे नम:

श्रीप्रतिवादि भयंकर अण्णा स्वामीजी प्रपत्ति

श्रीरम्यवरयोगीन्द्र श्रीपादाब्ज मधुव्रतम् ।
श्रीवादिभयकृत्सूनुं श्रीनिवासगुरुं भजे ।।

श्रीरंगहस्तिगिरिवेंकटभूधरादिदिव्यस्थलेशविषया: कृतवान्प्रपत्तिम्।
यो वादिभीकरगुरु: प्रथमान कीर्तिस्तस्यैव दिव्यचरणौ शरणं प्रपद्ये ।।१।।

श्रीमच्छठारिमुखपूर्वगुरुप्रणीतसद्द्राविडोक्तिविततीषु कृतान्तरंग ।
वादीन्द्रभीकरगुरो महनीयशील शोभायमानचरणौ शरणं प्रपद्ये ।।२।।

श्रीरम्ययोगिपदपद्ममरन्दपानसंवृद्धबोधसमलंकृतचंचरीक ।
वादीन्द्रभीतिकरसंश्रितपोषणैक जाग्रत्त्वदीयचरणौ शरणं प्रपद्ये ।।३।।

अद्वैतवादिमदवारणकुम्भडम्भसंभेदने दृढपराक्रम पञ्चवक्त्र ।
वादीन्द्रभीकरगुरो मदनुग्रहाय प्राप्तौ त्वदीयचरणौ शरणं प्रपद्ये ।।४।।

रामानुजार्यवरभाष्यपुराणसूक्तिगम्भीरभावविशदीकरणप्रवीण ।
वादीन्द्रभीकरगुरो प्रथितप्रभाव भक्त्यात्वदीयचरणौ शरणं प्रपद्ये ।।५।।

कापूर्वइत्यभिहितं वचनं निशम्य काञ्चीपुरी न इति चोत्तरमुक्तवान् य:।
तस्यैव वादिभयकृद्गुरुपुंगवस्य तादृक्प्रभावचरणौ शरणं प्रपद्ये ।।६।।

रामानुजार्यमुनियामुनराममिश्रपद्माक्षनाथमुनिसूरिपदाम्बुजेषु ।
भक्तिं दृढां रचयत: प्रतिवादिभीकरार्यस्य दिव्यचरणौ शरणं प्रपद्ये ।।७।।

पाषण्डषण्डवनदाहदवायमानवेदान्तदेशिककृपापरिलब्धबोध ।
वादीन्द्रभीकरगुरो मम वाञ्छितार्थलाभायमानचरणौ शरणं प्रपद्ये ।।८।।

वेदान्ततर्ककवितादिविचित्रतन्त्रनानार्थतत्वपरिशीलनजागरूक ।
वादीन्द्रभीकरगुरो मम पातकौघविच्छेदकारिचरणौ शरणं प्रपद्ये ।।९।।

आषाढमासि गुरुपुष्यदिनेवतीर्ण सौशील्यशान्ति करुणादिगुणामृताब्धे ।
वादीन्द्रभीकरगुरो मम भागधेय स्वामिंस्त्वदीयचरणौ शरणं प्रपद्ये ।।१०।।

श्री श्रीनिवासहृदयाब्जविकासमित्र श्रीवत्सवंशवरभूषणसच्चरित्र ।
वादीन्द्रभीतिकरवर्य भवत्कृपाया: पात्रं कुरुष्व भगवन् शरणागतं माम् ।।११।।

*

॥ श्रीवादिभीकरमहागुरवे नमः ॥

श्रीप्रतिवादि भयंकर अण्णा स्वामीजी मंगलाशासनम्

श्रीरंगादिस्थलेशानां प्रपत्तिं कमलांघ्रिषु ॥
मंगलाशासनं चापि कुर्वते नित्यमंगलम् ॥१॥

वकुलालंकृते श्रीमच्छठकोपपदद्वये ।
भक्तिं कलयते वादिभीकरायास्तु मंगलम् ॥२॥

स्वीयपादाब्जभक्तानां विभूतिद्वयदायिने ।
विख्यातयशसे वादिभीकरार्याय मंगलम् ॥३॥

वात्सल्यशीलशान्त्यादिकल्याणगुणशालिने ।
वात्स्याय वादिभयकृद्गुरुवर्याय मंगलम् ॥४॥

वत्सान्वयसुधासिन्धुवर्धमानसुधांशवे ।
वादिभीतिकरार्याय मंगलं महितौजसे ॥५॥

पराङ्कुशवचोवार्द्धिपयोमानुषचेतसे ।
परवादिमदाटोपपाटनायास्तु मंगलम् ॥६॥

वाधूलदेशिकादीनां श्रीभाष्यार्थप्रदायिने ।
वादिभीतिकरार्याय देशिकेन्द्राय मंगलम् ॥७॥

श्रीरम्ययोगिपादाब्जप्राप्यप्रापकभावताम् ।
प्राप्ताय वादिभयकृद्गुरुवर्याय मंगलम् ॥८॥

आषाढमासि मेदिन्यामवतीर्णाय धीमते ।
गुरुपुष्यदिने वादिभीकरार्याय मंगलम् ॥९॥

अद्वैतवादिसिद्धान्तविध्वंसपटु वाग्मिने ।
अस्तुमंगलमार्याय वादिभीकरसूरये ॥१०॥

श्रीमते सौम्यजामातृमुनिपादाबुजद्वये ।
वादिभीतिकरायास्तु भक्तिनिष्ठाय मंगलम् ॥११॥

मंगलं गुरुवर्याय मंगलं गुणसिन्धवे ।
वादिभीतिकरार्याय नित्यश्रीर्नित्यमंगलम् ॥१२॥



।। श्रीवादिभीकरमहागुरवे नमः ।।

श्रीप्रतिवादि भयंकर अण्णा स्वामीजी मंगलपद्य

मायिमतंगजसमस्तककोटीपाटनपाटलपाणितलो यः ।
श्रुत्यटवीकुहरेषु समिन्धे स प्रतिवादिभयंकरसिंहः ।।
अकविं कवियन् अपटुं पटुयन् अबुधं बुधयन् अगुरुं गुरुयन् ।
परवादिभयंकरपादरजः परमाणुपराक्रम उल्लसति ।।

श्री प्रतिवादि भयंकर गादि स्वामीजी का मंगल हो...!

|| श्रीवादिभीकरमहागुरवे नमः ||

श्री प्रतिवादि भयंकर अण्णा स्वामीजी वाळितिरूनामं

मन्नुपुहळ् मणवाळ मुन्निक्कन्बन् वाळिये,
मारन् शठकोपन् मोळि वळुवादान् वाळिये,
अन्नैयिलुमडैन्दवर् पाल् अरूलुडैयोन् वाळिये,
एन्नैयुंतन् इन्नरूळालेडुत्तळित्तान वाळिये,
इरण्डुलकुं तन्पुहळैएत्तुमवन् वाळिये,
पन्नुकलै याळ्वार् हळ् पदमुडैयोन्वाळिये,
परवादिभयंकरमण्णन् पडियिलेन्नुं वाळिये,
मालैपुनै तोळान् मणवाळमामुनिवन् कोलं मरवाद कोण्डले पालमुदम्,
एन्नुम् परवादिभयंकरमण्णने इन्नुमोरूनूत्ताण्डिरूम् ।

।। श्रीमदनन्तसुरिगुरुवर्याय नम: ।।

श्रीमद् अनंताचार्य स्वामीजी सुप्रभातम्

श्रीवत्सवंशवररत्नमणिप्रदीप श्रीकृष्णसूरिसुमहोत्तमरत्नराशे ।
रात्रिर्गता हि जगतां विजहीहि निद्रां श्रीमन्ननन्तभगवँस्तव सुप्रभातम् ।।१ ।।

श्रीचूर्णमाशु विमले वदने दधाना प्राची दिशापि कमलेव निजेशपूजाम् ।
भातीव कर्तुमनघात्मतमोपहत्यै श्रीमन्ननन्तभगवँस्तव सुप्रभातम् ।।२ ।।

सर्वेऽर्चकास्तव गुरो: सविधेऽखिलस्य स्नानीयवस्त्वथ सुपूजनवस्तुजातम् ।
सम्पाद्य नाथमिव भृत्यजना: श्रयन्ते द्रष्टुं ह्यनन्तभगवँस्तव सुप्रभातम् ।।३ ।।

आक्रीडकाननगता अपि पंजरस्था: सर्वेऽपि पक्षिनिवहा रमणीयरागा: ।
कूजन्ति नो गुरुरवेदिति सम्प्रहृष्टा: श्रीमन्ननन्तभगवँस्तव सुप्रभातम् ।।४ ।।

पुष्पद्रुभाश्च भगवतश्चरणारविन्दयुग्मार्चनाय सुमनांसि निजानि सद्य: ।
सम्पातयन्ति सुमहास्पृहणीयशीला: श्रीमन्ननन्तभगवँस्तव सुप्रभातम् ।।५ ।।

भास्वानुदेति विधुरो विधुरस्तमेति उद्बोधमेति नलिनीवनमम्बुजाक्ष: ।
उद्बोध एव भवतोऽप्यधुनोचितोऽत: श्रीमन्ननन्तभगवँस्तव सुप्रभातम् ।।६ ।।

सन्नाशयन्प्रतिविवादिमहान्धकारान् मित्र: समेति भवतो वदनारविन्दम् ।
द्रष्टुं भवानपि तत: प्रथमोद्यत: स्याच्छ्रीमन्ननन्तभगवँस्तव सुप्रभातम् ।।७ ।।

हे श्रीजगद्गुरुवर ! प्रतिवादिदन्तिसिंहप्रचण्डकुपथार्णववाडवाग्ने।
निद्रां विहाय निजवैरिवनं दहाशु श्रीमन्ननन्तभगवँस्तव सुप्रभातम् ।।८।।

शिष्या वयं भगवतश्चरणारविन्दं द्रष्टुं समर्चितुमथो हृदयेऽपि धर्तुम्।
वेदा इवाब्धिशरणं प्रतिबोधयामः श्रीमन्ननन्तभगवँस्तव सुप्रभातम् ।।९।।

श्रीसम्प्रदायधुरमुद्वहतां वरिष्ठ उत्तिष्ठ चाशु कुरु दैनिकदेवकार्य्यम्।
श्रीमच्छठार्युदधिजां सुसुधां च देहि श्रीमन्ननन्तभगवँस्तव सुप्रभातम् ।।१०।।

छत्रञ्च चामरयुगं विजयध्वजञ्च पीठं सुवर्णबहुलं विविधं च वाद्यम्।
आदाय वाहनमथो भवदीयशिष्याः गायन्त्युपेत्य विशदं तव सुप्रभातम् ।।११।।

संस्कारपञ्चकयुता लसदूर्ध्वपुण्ड्रा वक्षोविराजि-तुलसीनलिनाक्षमाला: ।
वेदान्तशास्त्रपठनोत्सुकमानसाश्च गायन्त्युपेत्य भगवँस्तव सुप्रभातम् ।।१२ ।।

काशीनिवासिवरवादिगिरीन्द्रवज्र श्रीवैष्णवोत्पलरवे त्वरितं जहीहि ।
निद्रां, समुल्लसतु साधुमुखारविन्दं श्रीमन्ननन्त भगवँस्तव सुप्रभातम् ।।१३।।

श्रीवेंकटेशपदपंकजभृंगराज श्रीमच्छठारिगुरुसूक्तसुधाम्बुराशे ।
कान्तोपयन्तृमुनिदत्तवरासनस्थ निद्रां जहीहि भगवँस्तव सुप्रभातम् ।।१४।।

प्राचार्य्यवैभवसुरक्षणसक्तचित्त तद्दिव्यभाषितसुधावरवारिवाह ।
संसारदाव-सुविमूर्छितजीवलोकान् सञ्जीवयाशु भगवँस्तव सुप्रभातम् ।।१५।।

*

।। श्रीमदनन्तसुरिगुरुवर्याय नमः ।।

श्रीमद् अनंताचार्य स्वामीजी प्रपत्तिः

वत्सान्वयाम्बुधिविधू चरमार्थलब्धौ श्रीभाषिताब्जतरणी जगदेकवन्द्यौ।
श्रीलोकसूरिनिलये वरदेऽवतीर्णौ तीर्थावनन्तचरणौ शरणं प्रपद्ये।।१।।

यत्पूर्वपीठगणनास्ति चतुर्युतेषु पीठेषु सप्ततिषु चाष्टवरासनेषु।
कान्तोपयन्तृपदपंकजपावितेषू द्धाव्यावनन्तचरणौ शरणं प्रपद्ये।।२।।

यद्धव्यपूर्वपूरुषो भगवानन्तो तीर्थे गुरौ च नृपहैदरराजधान्याम्।
चक्रे समौ सुसमदृग्वरदिव्यदेशौ सेव्यावनन्तचरणौ शरणं प्रपद्ये।।३।।

प्रोद्यत्प्रभाकरमहाप्रबलप्रतापौ प्राग्धर्मनीतिनलिनीमुखलासितारौ।
पाषण्डचण्डजडताचयचर्वितारौ चण्डांश्वनन्तचरणौ शरणं प्रपद्ये।।४।।

आनन्दकाननमहोद्भटवादिदन्ति द्वन्द्वानिनादितदिशास्तमदा विदीर्णाः।
शब्देन शास्त्रनखरैः प्रखरैः प्रकोपं सिंहावनन्तचरणौ शरणं प्रपद्ये ।।५।।

तादृग्प्रचण्डदिगिभप्रभवादिवृन्दाः श्रुत्वैव यन्निनदमस्तसमस्तदर्पाः।
यातुं न जास्वभि भयानकमास्यमीशाः सिंहावनन्तचरणौ शरणं प्रपद्ये ।।६ ।।

द्रष्टुं न चाप्यशकतामहतामतस्तान्लोकान्तकापथकुपालसुताननम्रान्।
कारुण्यसिन्धुपरकालपदावलम्बौवीरावनन्तचरणौ शरणं प्रपद्ये ।।७।।

कांचीनिवासिप्रतिवादिभयंकरार्य्यौं सम्पादिताखिलसुवैष्णवधर्ममेलौ।
श्रीमद्यतीन्द्रविजयध्वजलम्बवंशौ शस्यावनन्तचरणौ शरणं प्रपद्ये ।।८।।

श्रीवाडवज्वलनपूर्वशिखामकाष्टां पत्रे च वैदिकसमस्तसुमञ्जुभाषे ।
तल्लेखकौशलसुदर्शनभव्ययन्त्रं भव्यावनन्तचरणौ शरणं प्रपद्ये ।।९ ।।

भाषाङ्गनास्यवरसारसहासहंसौ भाषाज्वरप्रशमनौ शमनाध्वरोधि ।
सन्तेनतु: सुरसपूरुषसूक्तभाष्यं भव्यावनन्तचरणौ शरणं प्रपद्ये ।।१० ।।

देशे गताम्भसि मरावध मोहमय्यां वैकुण्ठधामनिमधाम्न्यभिषिक्तवन्तौ ।
रामानुजाङ्घ्रिशरणौ वरवेंकटेशं धर्मावनन्तचरणौ शरणं प्रपद्ये ।।११ ।।

कृष्णांघ्रिपंकजपलाशविलासदासान् कृत्वा यतीन्द्रभगवच्चरणाम्बुजाशान् ।
देशान्दिशश्च समयानिह सार्वभौमौ नाथावनन्तचरणौ शरणं प्रपद्ये ।।१२ ।।

श्रीमाष्यकारविजयाप्तमहाघनेशौ श्रीमच्छठारिचणाम्बुजराजहंसौ ।
आर्ताश्रयौ निगमिनां समुपेयदेशौ शेषावनन्तचरणौ शरणं प्रपद्ये ।।१३ ।।

संसारघोरदवदग्धनिवासवृक्षौ वेदान्तवेद्यवरदेशपदाप्तिशिक्षौ ।
श्रीसम्प्रदायधुरमृद्धहतां सुरक्षौ श्रीवन्ध्वनन्तचरणौ शरणं प्रपद्ये ।।१४ ।।

अष्टादशां सुविजयाज्जगतामवाप्य प्रेमास्पदं सुरनदीसरयूसुमेलम् ।
देशं विहारमभिगम्य गतौ स्वदेशं दिव्यावनन्तचरणौ शरणं प्रपद्ये ।।१५ ।।



।। श्रीमदनन्तसुरिगुरुवर्याय नम: ।।

श्रीमद् अनंताचार्य स्वामीजी मंगलाशासनम्

मंगलं देशिकेन्द्राय श्रीशेषाचलजन्मने। श्रीशेषप्रतिरूपाय श्रीयुतानन्तसूरये ।।१ ।।

अधीतसाङ्गवेदाय द्राविडागममूर्तये। मंगलं कृष्णपुत्राय श्रीयुतानन्तसूरये ।।२ ।।

संस्कारपञ्चकं लब्धं येन स्वपितुरेव च। मंगलं गुरुगोत्राय श्रीयुतानन्तसूरये ।।३ ।।

श्रीरंगवेंकटेशाब्धेर्लब्धज्ञानामृताय च। मंगलं गुरुवर्य्याय श्रीयुतानन्तसूरये ।।४ ।।

रीवोंदयपुराधीशप्रमुखैरर्चिताङ्घ्रये। मंगलं चान्यभूपालै: श्रीयुतानन्तसूरये ।।५ ।।

रामानुजमुनेरुर्ध्वं भद्रं भ्रामयते ध्वजम्। मंगलं योगिवर्य्याय श्रीयुतानन्तसूरये ।।६ ।।

प्राचार्य्यदिव्यसूरीणां सुप्रपत्तिस्थलेऽनिशम्। मंगलं ख्यातयशसे श्रीयुतानन्तसूरये ।।७।।

योगिवर्य्यैर्यतीन्द्रैश्च विष्वक्सेनादिभिर्मुदा। समर्चिताङ्घ्रिपद्माय श्रीयुतातन्तसूरये ।।८।।

मंगलं रचितानन्तश्रीनिवाससुसद्मने। श्रीभाष्यार्थप्रदीपाय श्रीयुतानन्तसूरये ।।९।।

महामंगलदेवाय महामंगलकर्मणे। मंगलं दिव्यरूपाय श्रीयुतानन्तसूरये ।।१०।।

स्वासाधारणनादेन दारितारिसुवक्षसे। मंगलं चित्रसिंहाय श्रीयुतानन्तसूरये ।।११।।

महामंगलधर्माय महामंगलवर्ष्मणे। मंगलं भक्तिनिष्ठाय श्रीयुतानन्तसूरये ।।१२।।

मंगलं वैष्णवेन्द्राय सौलभ्यगुणसिन्धवे। सर्वतन्त्रस्वतन्त्राय-श्रीयुतानन्तसूरये ।।१३।।

मुम्बयीनगरस्थश्रीवेंकटेशाश्रुमोचनम्। यत्कृते मंगलं तस्मै श्रीयुतानन्तसूरये ।।१४।।

स्वोदयेनार्दिताशेषपाषण्डग्रहतेजसे। श्रीयुतानन्तदेवाय भूयो भूयात्सुमंगलम् ।।१५।।



।। श्रीमदनन्तसुरिगुरुवर्याय नमः ।।

श्री अनंताचार्य स्वामीजी का वाळितिरुनामं

मंगलं गुरुवर्याय, मंगलं गुणसिन्धवे ।
वादिभीतिकरार्याय नित्यश्रीर्नित्यमंगलम् ।
एत्तिशैयुं जगगुरूवेन्नु इयम्बनिन्नोन् वाळिए ।
एळिल् माशि शोदितनिल् इंगुदित्तोन्वाळिए ।
मुत्तितरुं नन्मोळिहळ् मोळियवन्दोन् वाळिए ।
मूदुवरां नरकुरवर मोळि वल्लोन् वाळिए ।
अत्तिगिरियरुळाळ्र अडिपणिन्दोन् वाळिए ।

अळविल्ला गुणनिधियाय् अमैन्दुनिन्रोन् वाळिए।
भक्तिमिहु कृष्णारियन् परनपुदलवन् वाळिए।
पण्डितरामनंतगुरु पारिदनिल वाळिए।
अत्तिगिरिवाळ अरूळाळर् तां वाळ तत्तुवन्ळ् भाष्य पोरूळ् मरैवाळ
एत्तिशैयुं जगगुरूवाय विळंगिय शीर
गादि अनंतारियने इन्नुमोरूनून्ताण्डिरूम्।



।। श्रीमदनन्तसुरिगुरुवर्याय नमः ।।

श्रीमद् अनन्ताचार्य स्वामीजी अष्टोत्तरशत नामावलि

१. ॐ श्रीमते नमः
२. ॐ धीमते नमः
३. ॐ महते नमः
४. ॐ प्राज्ञाय नमः
५. ॐ प्रज्ञानिधये नमः
६. ॐ अमेयधिये नमः
७. ॐ कमनीयवपुषे नमः
८. ॐ कान्ताय नमः
९. ॐ कारूण्यनिधये नमः
१०. ॐ आत्मवते नमः
११. ॐ सदाचारपराय नमः
१२. ॐ सेव्याय नमः
१३. ॐ सर्वशास्त्रार्थकोविदाय नमः
१४. ॐ वत्सान्वयमणये नमः
१५. ॐ वादिभीकृद्गुरुकुलोदिताय नमः
१६. ॐ जितेन्द्रियाय नमः

१७. ॐ जितक्रोधाय नम:
१८. ॐ जितदुर्वादिमण्डलाय नम:
१९. ॐ दान्ताय नम:
२०. ॐ भ्रान्तिविदूरस्थाय नम:
२१. ॐ प्रकृष्टगुणसागराय नम:
२२. ॐ सत्यवादिने नम:
२३. ॐ सतांश्रेष्ठाय नम:
२४. ॐ सर्वज्ञाय नम:
२५. ॐ सर्वपूजिताय नम:
२६. ॐ जगद्गुरुवे नम:
२७. ॐ जगत्सेव्याय नम:
२८. ॐ साधुसेविने नम:
२९. ॐ सतां निधये नम:
३०. ॐ अप्रमेयमतये नम:
३१. ॐ शान्ताय नम:
३२. ॐ पूर्वाचार्यसमाय नम:
३३. ॐ समाय नम:
३४. ॐ योगीश्रेष्ठाय नम:
३५. ॐ मुनिश्रेष्ठाय नम:
३६. ॐ महर्षिसमवैभवाय नम:

३७. ॐ माननीयाय नम:
३८. ॐ महाविदुषे नम:
३९. ॐ कवीन्द्राय नम:
४०. ॐ कान्तविग्रहाय नम:
४१. ॐ निर्मलोदारवाग्गुम्भाय नम:
४२. ॐ निपुणाय नम:
४३. ॐ निर्मलाकृतये नम:
४४. ॐ कृष्णसूरिसुताय नम:
४५. ॐ सूर्यसमतेजसे नम:
४६. ॐ विधुपमाय नम:
४७. ॐ स्वातीनक्षत्रसंजाताय नम:
४८. ॐ श्रीमुखाब्दसमुद्भवाय नम:
४९. ॐ कुम्भमासोदिताय नम:
५०. ॐ काशीविद्वज्जेत्रे नम:
५१. ॐ कृतिने नम:
५२. ॐ सुधिये नम:
५३. ॐ मनीषिमान्याय नम:
५४. ॐ मान्यात्मने नम:
५५. ॐ सर्वविद्याविशारदाय नम:
५६. ॐ असंख्यशिष्यजीवातवे नम:

५७. ॐ राजस्थानसुपूजिताय नम:
५८. ॐ पवित्रीकृतसत्तीर्थाय नम:
५९. ॐ उत्तमाय परमार्थविदे नम:
६०. ॐ पुष्करक्षेत्रनिलयाय नम:
६१. ॐ पुष्कराक्षाय नम:
६२. ॐ पुराणविदे नम:
६३. ॐ श्रीरंगार्यपदाम्भोजसेवीने नम:
६४. ॐ सेवितसद्गुरवे नम:
६५. ॐ नानाग्रन्थविनिर्मात्रे नम:
६६. ॐ नानाग्रन्थप्रकाशकाय नम:
६७. ॐ नानाविद्वत्पूजिताङ्घ्रये नम:
६८. ॐ नानाग्रन्थोपदेशकाय नम:
६९. ॐ रहस्यत्रयदिव्यार्थदेशिकाय नम:
७०. ॐ देशिकोत्तमाय नम:
७१. ॐ श्रीवादिभीकराचार्यपर्यायाय नम:
७२. ॐ पण्डितोत्तमाय नम:
७३. ॐ परप्रियहिताकाङ्क्षिणे नम:
७४. ॐ पापभीरवे नम:
७५. ॐ प्रसिध्दधिये नम:
७६. ॐ प्रामाणिकाय नम:
७७. ॐ पवित्रागांय नम:
७८. ॐ पवित्रगुणसागराय नम:

७९. ॐ तत्वत्रयार्थदाय नम:

८०. ॐ श्रीमद्भाग्भूषामहितार्थविदे नम:

८१. ॐ श्रीभाष्यार्थप्रदाय नम:

८२. ॐ प्राज्ञसंगसेवितपादुकाय नम:

८३. ॐ यतीन्द्रदर्शनोद्धारकारिणे नम:

८४. ॐ कार्यविंदा बराय नम:

८५. ॐ वरयोगिपदाम्भोजभृगांय नम:

८६. ॐ लोकार्यसेवकाय नम:

८७. ॐ शठारिमुख्यसत्सूरिभक्ताय नम:

८८. ॐ भक्तनिषेविताय नम:

८९. ॐ नाथयामुनमुन्यादिगुरुपादाब्जसेवकाय नम:

९०. ॐ यतीन्द्रकुरनाथार्यभट्टार्यादिगिरांनिधये नम:

९१. ॐ वेणुगोपालभगवन्नित्याराधननिष्ठिताय नम:

९२. ॐ श्रीहस्तिशैलनाथाङ्घ्रिभक्ताय नम:

९३. ॐ भक्तिमतां वराय नम:

९४. ॐ दूर्वादिगर्वनिर्हन्त्रे नम:

९५. ॐ दुराक्षेपनिरासकाय नम:

९६. ॐ वाल्मीकिभावदीपादिकृतिदाय नम:

९७.ॐ कृतिनां वराय नम:
९८.ॐ पुंसूक्तभाष्यनिर्मात्रे नम:
९९.ॐ पुरूषोत्तमतत्वविदे नम:
१००.ॐ बडबानलसद्ग्रन्थदात्रे नम:
१०१.ॐ दात्रे नम:
१०२.ॐ अनसूयकाय नम:
१०३.ॐ आद्यानन्तगुरोस्तुल्याय नम:
१०४.ॐ तुल्यहीनात्मवैभवाय नम:
१०५.ॐ श्रीवेंकटेशभगवत्प्रतिष्ठापनदक्षिणाय नम:
१०६.ॐ आचार्यवर्याय नम:
१०७.ॐ अनन्तार्यवर्याय नम:
१०८.ॐ विपुलकीर्तिमते नम:



।। श्रीमदनन्तसुरिगुरुवर्याय नमः ।।

श्रीमद् अनंताचार्य स्वामीजी भजन-१

श्रीमद् रामानुज जगद्गुरु श्री, श्रीमदनन्ताचारी हो।
श्रीप्रतिवादी भयंकर स्वामी, का जय जय नित मंगल हो। टेक।

दक्षिण में कांची नगरी के, आप बिराजन हारे हो।
श्रीवरदराज वैभव प्रकाश, करने वाले नित मंगल हो।।१ ।।

सब देशों को करके पवित्र, श्रीकाशि पधारन वाले हो।
श्रीसम्प्रदाय वैभव प्रकाश, करनेवाले नित मंगल हो।।२ ।।

श्रीवैष्णव सम्मेलन अनेक, के आप करावन वाले हो।
सब भारत में वैभव प्रकाश, करने वाले नित मंगल हो।।३।।
दिव्यदेश बम्बई के अन्दर, आप स्थापने वाले हो।
श्री वेंकटेश वैभव प्रकाश, करने वाले नित मंगल हो।।४।।
कलकत्ता में सनातन धर्मसभा, के आप करावन वाले हो।
सन्मानित हो वैभव प्रकाश, करने वाले नित मंगल हो।।५।।
दिल्ली वर्णाश्रम स्वराज संघ, सभा करावन वाले हो।
निर्वाहक हो वैभव प्रकाश, करने वाले नित मंगल हो।।६।।
छपरा राणी का धन्य भाग, को आप करावन वाले हो।
अन्तिम सेवा वैभव प्रकाश, करने वाले नित मंगल हो।।७।।

श्रावण सुद तीज मंगला को, वैकुण्ठ पधारन वाले हो।
तज श्रीविग्रह वैभव प्रकाश, करने वाले नित मंगल हो।।८।।
श्रीविष्णुदास जस गावत है, श्रीचरण लगावन वाले हो।
बिरजा के पार वैभव प्रकाश, करने वाले नित मंगल हो।।९।।

श्रीमद् अनंताचार्य स्वामीजी भजन-२

अब तो सदा आचार्य चरणों, के गुणों को गाइये।
गायकर आनन्द से, वैकुण्ठ चढ़ना चाहिये।। टेक।।

आचार्य सबके इष्ट हैं, श्रीहरि सदृश ही मानिये।
मानकर वेदों की आज्ञा, दिव्य पद को जाइये।।१।।

सुश्रुषाकर श्रीचरण की, पूर्ण अभिमत पाइये।
प्राप्त कर निश्चिन्त हो, निर्भय विचरणा चाहिये।।२।।

हैं दया सागर गुरु वर, शरण क्यों नहिं होइये।
शरण हो भव समुद्र से, फिर पार पाना चाहिये।।३।।

परिपूर्ण गुरु के लक्षणों को, झलकता जहँ पाइये।
पाय ऐसे सद्‌गुरु को, स्मरण करना चाहिये।।४।।

ऐसे सदानुष्ठान भूषित, अनन्त देशिक पाइये।
प्राप्तकर निज दास को, बिरजा का स्नान कराइये।।५।।



श्रीमद् अनंताचार्य स्वामीजी आरती

जय सतगुरु राया, स्वामी जय सत्गुरु राया।
श्रीप्रतिवादि भयंकर जगद्गुरु राया ।। टेक।।
नदी पैसुनी के तट सोहे, कांची मन भाया, स्वामी कांची मन भाया।
अष्टादश प्रभु राजें, वरदराज राया।।१ ।।
श्रीप्रतिवादि भयंकर मठ के, अधिपति हो राया, स्वामी अधिपति हो राया।
श्रीकृष्णात्मज प्रगटे श्रीअनन्तराया।।२ ।।
देश-देशमें आप पधारे, काशीमें राया, स्वामी काशीमें राया।
करि दिग्विजय पधारे, चहुंदिशि यश पाया।।३ ।।

श्रीवैष्णव सम्मेलन कीन्हें, तीर्थराज भाया, स्वामी तीर्थराज भाया।
बम्बई, शोलापुर में आप करी दाया।।४।।
धन्य भाग छपरा राणीका, जग में यश छाया।
त्यागी लीला विभूती, नित्य लोक पाया।।५।।
श्रीवैष्णव को दास गात अस, चरण-कमल भाया, स्वामी चरण-कमल भाया।
श्रीआचार्य कृपासे, श्रीहरि पद पाया।।६।।

श्रीरामानुज स्वामीजी के पांच मुख्य शिष्य

१. श्री कूरेश स्वामीजी
२. श्री दाशरथि स्वामीजी
३. श्री आंध्रपूर्ण स्वामीजी
४. श्री गोविन्दाचार्य स्वामीजी
५. श्री धनुर्दास स्वामीजी

श्रीरामानुज स्वामीजी महाराज के पांच गुरु

१. श्री महापूर्ण स्वामीजी (समाश्रयण आचार्य)

२. श्री शैलपुर्ण स्वामीजी (श्री वाल्मिकी रामायण का अध्ययन कराया)

३. श्री गोष्ठीपूर्ण स्वामीजी (श्री मन्त्र रहस्य प्रदान किया)

४. श्री मालाधर स्वामीजी (श्री सहस्त्रगिती का अध्ययन कराया)

५. श्री वररंगाचार्य स्वामीजी (श्री दिव्य प्रबन्ध का अध्ययन कराया और आचार्य निष्ठा का वैभव बताया)

आलवार

१. श्री सरोयोगी स्वामीजी (श्री पांचजन्य शंख के अवतार)
२. श्री भूतयोगी स्वामीजी (श्री कौमोदकी गदा के अवतार)
३. श्री महद्‌योगी स्वामीजी (श्री नन्दक खड्‌ग के अवतार)
४. श्री भक्तिसार स्वामीजी (श्री चक्रराज सुदर्शनजी के अवतार)
५. श्री मधुरकवि स्वामीजी (श्री द्वारपाल के अवतार)
६. श्री शठकोप स्वामीजी (श्री विष्वक्सेनजी के अवतार)
७. श्री कुलशेखर स्वामीजी (श्री कौस्तुभमणी के अवतार)
८. श्री विष्णुचित्त स्वामीजी (श्री गरुडजी के अवतार)
९. श्री गोदाम्बाजी (श्री लक्ष्मीजी के अवतार)
१०. श्री भक्तांघ्रिरेणु स्वामीजी (श्री वनमाला अवतार)

११. श्री योगिवाहन स्वामीजी (श्रीवत्स अवतार)
१२. श्री परकाल स्वामीजी (श्री शार्ङ्ग धनुष अवतार)

श्री वरवरमुनि स्वामीजी द्वारा स्थापित अष्टदिग्गज्

१) श्री प्रतिवादी भयंकराचार्य स्वामीजी (प्रतिवादिभयंकर अण्णा स्वामीजी)
२) श्रीतोताद्रि स्वामीजी (वानमामलै जीयर)
३) श्री भट्टनाथ स्वामीजी (पट्टर्पिरान जीयर)
४) श्री वेंकटरामानुज स्वामीजी (तिरुवेंकट रामानुज जीयर)
५) श्री वरदनारायणाचार्य स्वामीजी (कोयिल्-अण्णन्)
६) श्री देवराजाचार्य स्वामीजी (एरुम्बियप्पा)
७) श्री प्रणतार्तिहारी स्वामीजी (अप्पिळ्ळै)
८) श्री रामानुज स्वामीजी (अप्पिळ्ळार्)

|| अस्मद्गुरुभ्यो नम: ||

भगवान ही उपाय

श्रीवैष्णवों का कर्तव्य

भगवान ही उपेय

- सदैव ललाट पर ऊर्ध्वपुंड्र तिलक धारण करना ।
- प्रतिदिन श्रीपाद तीर्थ त्रिवेडी ग्रहण करना।
- प्रतिदिन आचार्य का तनियन, प्रपत्ति, मंगलाशासन, वाळितिरूनामं का पाठ करना।
- तिरुमाली (घर) में विराजमान भगवान की सेवा में प्रतिदिन उपस्थित होकर प्रेमसे कैंकर्य करना।
- प्रतिदिन हमारे संप्रदाय के सदाचार्यों के सारतम ग्रंथो का वाचन करना।
- देवी देवताओं के मंदिर में नहीं जाना, उनको प्रणाम नहीं करना, उनका तीर्थ प्रसाद नहीं लेना।

- उपायान्तर की कोइ भी चीज जैसे खडे, अंगूठियाँ, डोरा, ताबीज, यंत्र धारण नहीं करना।
- सकाम पाठ अनुष्ठान नहीं करना और भगवान से कभी कुछ नहीं मांगना।
- भगवत-भागवत-आचार्य अपचार, असह्य अपचार, अकृत्य करण नहीं करना।
- भगवान को भोग लगाकर ही प्रसाद ग्रहण करना।
- अभक्ष्य पदार्थ (प्याज, लहसून इ.) का तथा दुर्व्यसनोंका सर्वथा त्याग करना।
- भगवत-भागवत-आचार्य कैंकर्य करते हुये श्री रामानुज स्वामीजी से प्रदर्शित मार्ग पर चलना।

- श्री प्रतिवादि भयंकर गादि स्वामीजी श्री श्रीनिवासाचार्यजी महाराज

श्रीवादिभीकरमहागुरवे नम:

* तिरूनक्षत्र (अवतार दिवस) *

आचार्य	मास	नक्षत्र
श्रीप्रतिवादिभयंकर अण्णा स्वामीजी	कर्क	पुष्य
श्रीअनंताचार्य स्वामीजी	कुम्भ	स्वाति
श्रीकृष्णमाचार्य स्वामीजी	सिंह	स्वाति
श्रीनिवासाचार्य स्वामीजी	सिंह	विशाखा
श्रीअनंताचार्य स्वामीजी (बालक स्वामीजी)	कर्क	ज्येष्ठा

श्रीवादिभीकरमहागुरवे नमः

* तीर्थ उत्सव (परमपद दिवस)*

आचार्य	मास	पक्ष	तिथि
श्रीप्रतिवादिभयंकर अण्णा स्वामीजी	मीन	शुक्ल	नवमी
श्रीअनंताचार्य स्वामीजी	कर्क	शुक्ल	तृतिया
श्रीकृष्णमाचार्य स्वामीजी	वृश्चिक	शुक्ल	अष्टमी